एव न तु तस्य दानाधमनविक्रयान् कर्त्तुमर्हति। किन्तु भर्त्तुरौर्द्ध्वदैहिकक्रियार्थं दानादिकमप्यनुमतम्। वर्त्तनाशक्तौ आधमनमप्यनुमतं तदशक्तौ विक्रयणमपि। भर्त्तुरौर्द्ध्वदैहिकक्रियार्थमर्थानुरूपं भर्त्तृसपिण्डभर्त्तृगुरुभर्त्तृदौहित्रसन्तानभर्त्तृभागिनेयभर्त्तृमातुलेभ्यो दद्यात्। एतेषामभावे स्वपितृकुले दद्यात्॥ पत्न्यभावे दुहिता। तत्रापि प्रथमं कुमारी। अत्रायं विशेषः कन्या जाताधिकारा पश्चात् परिणीता सती अविद्यमानपुत्त्रा यदि म्वता तदा तत्पितृदाये सपुत्त्रायाः सम्भावितपुत्त्राया भगिन्यास्तुल्याधिकारः। कुमार्य्यभावे चोढ़ायाः पुत्त्रवत्याः सम्भावितपुत्त्रायाश्च तुल्याधिकारः। एतयोरेकतराभावे अन्याधिकारिणी। एतयोरभावेऽपि बन्ध्यापुत्त्रहीनविधवयोर्नाधिकारः। सर्व्वदुहितृभावे दौहित्रस्याधिकारः। तदभावे पितुरधिकारः। तदभावे मातुरधिकारः। तदभावे सोदरस्याधिकारः। सोदराभावे सजातीयवैमात्रेयाधिकारः। तदभावे सोदरभ्रातृपुत्त्राणामधिकारः। संसर्ग्यसंसर्गिसोदरभ्रातृपुत्त्रेषु संसर्गिभ्रातृपुत्त्रस्याधिकारः। एवं संसर्ग्यसंसर्गिवैमात्रेयभ्रातृपुत्त्रे सति संसर्गिवैमात्रेयभ्रातृपुत्त्रस्याधिकारः। यदा त्वसंसर्गी सोदरभ्रातृपुत्त्रः संसर्गी चासोदरभ्रातृपुत्त्रस्तदा तयोर्युगपदधिकारः। यदा पुनः सोदरवैमात्रेयभ्रातृपुत्त्रौ संसर्गिणावसंसर्गिणौ वा तदा उभयथैव सोदरभ्रातृपुत्त्रस्याधिकारः। भ्रातृपुत्त्राभावे भ्रातृपौत्त्रस्याधिकारः। अत्रापि सोदरवैमात्रेयभ्रातृपुत्त्रवत् क्रमो बोध्यः। भ्रातृपौत्त्राभावे पितृदौहित्रस्याधिकारः। अत्र सोदरभगिनीपुत्त्रवैमात्रेयभगिनीपुत्त्रयोस्तुल्यवदधिकारः। पितुर्दौहित्राभावे पितामहस्याधिकारः। पितामहाभावे पितामह्या अधिकारः। पितामह्यभावे पितृव्यस्याधिकारः। तदभावे पितृव्यपुत्त्रस्याधिकारः। तदभावे पितृव्यपौत्त्रस्याधिकारः। पितृव्यपौत्त्राभावे पितामहदौहित्रस्याधिकारः। पितामहदौहित्राभावे पितृव्यदौहित्रस्याधिकारः। तदभावे प्रपितामहस्याधिकारः। तदभावे प्रपितामह्या अधिकारः। ततः पितामहभ्राताधिकारी। तदभावे पितामहभ्रातृपुत्त्रः। तदभावे पितामहभ्रातृपौत्त्रः। ततः प्रपितामहदौहित्रोऽधिकारी। ततः पितामहभ्रातृदौहित्रोऽधिकारी। तदभावे मातामहः। तदभावे मातुलः। तदभावे मातृष्वस्रीयः। तदभावे मातुलपुत्त्रः। तदभावे मातुलपौत्त्रः। एषामभावे सकुल्यः। सकुल्योऽपि द्विविधः अधस्तन ऊर्द्ध्वतनश्च तत्र प्रपौत्त्रपुत्त्रावधयोऽधस्तनाख्यः वृद्धप्रपितामहादिश्च ऊर्द्ध्वतनाख्यस्तत्राप्यादावधस्तनानां सकुल्यानां क्रमेणाधिकारः। तेषामभावे ऊर्द्ध्वतनानां क्रमेणाधिकारः। एवंविधसकुल्याभावे समानोदकाः। तदभावे आचार्य्यः। तदभावे शिष्यः तदभावे सहवेदाध्यायिब्रह्मचारिणः। तदभावे ग्रामस्थाः सगोत्राः। तदभावे तथाविधाः समानप्रवराः। उक्तपर्य्यन्ताभावे तद्ग्रामस्थास्त्रैविद्यत्वादिगुणयुक्ता ब्राह्मणा धनाधिकारिणः। एतेषामभावे ब्राह्मणधनवर्ज्जं राजाधिकारी। ब्राह्मणधनस्य तु गुणवद्ब्राह्मणपर्य्यन्ताभावे ब्राह्मणान्तरस्य ग्रामान्तरस्थस्यापि अधिकारः। वानप्रस्थयतिब्रह्मचारिणां धनं धर्म्मभ्रातृसच्छिष्याचार्य्या गृह्णीयुः। तदभावे चैकत्रवासी एकाश्रमी वा गृह्णीयात्। ब्रह्मचारी च द्विविधः नैष्ठिक उपकुर्व्वाणश्च। तत्र नैष्ठिकधने आचार्य्यस्याधिकारः। उपकुर्व्वाणस्य तु धनं पित्रादिभिरेव ग्राह्यम्। इति पुंधनाधिकारिणः॥ * ॥

अथ स्त्रीधनाधिकारक्रमः।

तत्र कुमारीधने प्रथमं सोदरभ्राताधिकारी। तदभावे माता तदभावे पिता। वरदत्तधने वरोऽधिकारी॥ * ॥

अथोढ़ास्त्रीधनाधिकारक्रमनिरूपणार्थं तद्धनं निरूप्यते। विवाहकाले लब्धं यौतुकं धनम् १ भर्त्तृनीयमाना पितृमातृकुलात् यद्धनं लभते तत् २ भर्त्तृदत्तम् ३ भ्रातृदत्तम् ४ पितृदत्तम् ५ मातृदत्तम् ६ द्वितीयविवाहार्थिना पूर्व्वस्त्रियै पारितोषिकं यद्दत्तं तत् ७ अन्नाच्छादनम् ८ अलङ्करणम् ९ गृहादिकर्म्मनिरूपशिल्पिभर्त्तृद्वारेणान्येषां गृहादिनिष्पादनाद्युत्कोचविधयान्येभ्यो यद्धनं लब्धं तत् १० पुत्त्रदत्तम् ११ मातुलादिदत्तम् १२ विवाहात् परतः पित्रादिना भर्त्रादिना च यद्दत्तम् १३। भर्त्तृदत्तस्थावरातिरिक्तानामेतेषां धनानां स्त्री दानादिकं कर्त्तुमर्हति॥ * ॥

तदेवं स्त्रीधने निरूपिते तस्यां म्वतायां तद्धनाधिकारी निरूप्यते। तत्र यौतुकधने कुमार्य्याः प्रथममधिकारः। तदभावे वाग्दत्तायाः तदभावे चोढ़ायाः पुत्त्रवत्याः सम्भावितपुत्त्रायाश्च युगपदधिकारः। तदभावे बन्ध्याविधवयोस्तुल्यवदधिकारः। तत्र कुमारी वाग्दत्ता जाताधिकारानन्तरं परिणीता सती पश्चाद्बन्ध्यात्वेनावधृता पुत्त्रमनुत्पाद्यैव विधवा भूता वा तदा तस्यां म्वतायां तत्संक्रान्तमातृधने तद्भगिन्योः पुत्त्रवतीसम्भावितपुत्त्रयोरभावे बन्ध्याविधवयोरप्यधिकारः। सर्व्वदुहितृभावे पुत्त्रस्याधिकारः। पुत्त्राभावे दौहित्रोऽधिकारी दौहित्राभावे पौत्त्रः। तदभावे प्रपौत्त्रः। तदभावे सपत्नीपुत्त्रः। तदभावे सपत्नीपौत्त्रः। तदभावे सपत्नीप्रपौत्त्रः। एतत्पर्य्यन्ताभावे ब्राह्मदैवार्षगान्धर्व्वप्राजापत्याख्यविवाहपञ्चकलब्धयौतुकधने भर्त्तुरधिकारः। भर्त्तुरभावे भ्रातुः। तदभावे माताधिकारिणी। तदभावे पिता। सपत्नीप्रपौत्त्रपर्य्यन्ताभावे आसुरराक्षसपैशाचाख्यविवाहत्रिकलब्धयौतुकधने तु प्रथमं मातुरधिकारः। तदभावे पितुः। पितुरभावे भर्त्तुः॥ अथायौतुकस्त्रीधनाधिकारिक्रमः। तत्र विवाहपूर्व्वापरकालपितृदत्तयौतुकाभ्यामतिरिक्तस्त्रीधने कन्यापुत्त्रयोर्युगपदधिकारः। तयोरेकतराभावे अन्यतरस्य तद्धनं तयोर्द्वयोरभावे ऊढ़ायाः पुत्त्रवत्याः सम्भावितपुत्त्रायाश्च तुल्यवदधिकारः। एतयोरेकतराभावे अन्यस्या अधिकारः। एतयोर्द्वयोरभावे पौत्त्रः। पौत्त्राभावे दौहित्रः। तदभावे प्रपौत्त्रः। तदभावे सपत्नीपुत्त्रः तदभावे सपत्नीपौत्त्रः। तदभावे सपत्नीप्रपौत्त्रोऽधिकारी। ततो बन्ध्या विधवा च तुल्यवदधिकारिण्यौ। एतयोरेकतराभावे चान्यतरस्याः। बन्ध्याविधवापर्य्यन्ताभावे यौतुकवत् ब्राह्मादिविवाहपञ्चकविवाहितायाः धने भर्त्तृभ्रातृमातृपितॄणां क्रमशोऽधिकारः। विवाहकाले तत्पूर्व्वापरकाले वा स्त्रियै यद्धनं पित्रा दत्तं तत्र धने प्रथमं कुमार्य्याः। तदनन्तरमूढ़योः पुत्त्रवतीसम्भावितपुत्त्रयोः। तदनन्तरं बन्ध्याविधवयोश्चाधिकारः। सर्व्वदुहित्रभावे पुत्त्रादेर्यौतुकधनान्तरवत् क्रमेणाधिकारः। ततो ब्राह्मादिविवाहपञ्चकलब्धयौतुकधनेषु पितृपर्य्यन्ताभावे आसुरादिविवाहत्रिकलब्धयौतुकधनेषु च भर्त्तृपर्य्यन्ताभावे देवरादेरधिकारः। तदभावे देवरभ्रातृश्वशुरयोः सुतानां युगपदधिकारः। एतेषामभावे असपिण्डोऽपि भगिनीपुत्त्रः। तदभावे भर्त्तृभागिनेयः। तदभावे भ्रातृसुतः। तदभावे जामाता। जामातृपर्य्यन्ताभावे सपिण्डानन्तर्य्यक्रमेण श्वशुरभ्रातृश्वशुरादीनां सपिण्डानामधिकारः। सपिण्डाभावे सकुल्याः समानोदकाः सगोत्राः समानप्रवराश्च पुंधनवत् क्रमेणाधिकारिणः। एतत्सर्व्वाभावे ब्राह्मणीधने स्वग्रामश्रोत्रियादेरधिकारः। क्षत्त्रियादिधने राज्ञ एवाधिकारः। इति स्त्रीधनाधिकारिणः॥ * ॥

अथ विभागानधिकारिणः।

क्लीवपतितजात्यन्धजन्मबधिर-उन्मत्तजड़-मूकपङ्गुपितृद्विट्निरिन्द्रियोपपातिकाचिकित्स्यरोगार्त्ताः। पतितवर्ज्जं एते भरणीयाः। पतितपुत्त्रवर्ज्जमेतेषां पुत्त्रा यदि निर्दोषाः तदांशभागिनः। क्लीवादीनां अपुत्त्रा भार्य्याः यदि सद्वृत्तास्तदा भर्त्तव्याः। एषां दुहितरो विवाहपर्य्यन्तं भरणीयाः॥ * ॥

अथ विभाज्याविभाज्यधननिर्णयः।

तत्र पैतामहं पित्रर्ज्जितं साधारणधनोपघातेनार्ज्जितञ्चेति त्रिविधं धनं सर्व्वैरेव विभाज्यम्। किन्तु तत्रार्ज्जकस्य द्व्यंशौ अन्येषामेकैकांशः साधारणधनानुपघातेन शौर्य्यप्राप्तं धनं एवं साधारणधनानुपघातेनार्ज्जितविद्याधनं पितृपितृव्यादिप्रसादादिना लब्धं धनं भार्य्याप्राप्तिकाले लब्धं धनं मित्रताप्राप्तं धनं आर्त्विज्यलब्धं एतान्यविभाज्यानि। विद्याधनन्तु समविद्याधिकविद्भ्यो देयं एवं यदि विद्याभ्यासतो भ्रातुः कुटुम्बमपरो भ्राता स्वधनव्ययशरीरायासाभ्यां बिभर्त्ति तदा तद्विद्यार्ज्जितधने मूर्खस्यापि अपरभ्रातुरंशित्वम्। स्वकुलात् पित्रादितो